# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – साहित्यम् | **CC-124** | समयः - ११ तः २ |
| दिनाङ्कः – २६/४/२०१६ | सन्दर्भग्रन्थः – शिशुपालवधम् (द्वितीयसर्गः) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **निम्नलिखितश्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) रत्नस्तम्भेषु संक्रान्तप्रतिमास्ते चकाशिरे ।<br>एकाकिनोऽपि परितः पौरुषेयवृता इव ॥<br>(२) नैतल्लध्वपि भूयस्या वचो वाचातिशय्यते ।<br>इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥<br>(३) सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः ।<br>स्यातामत्रौ मित्रे च सहजप्राकृतावपि ॥ | |
| **प्रश्नः -२** | **कस्यापि एकस्य परिचयात्मकम् उत्तरं लिखत ।** | ०८ |
| | (१) माघस्य जीवन-परिचयो दत्वा तेषां कर्तृत्वविषये चर्चां कुरुत ।<br>(२) "माघे सन्ति त्रयो गुणाः" अस्याः उक्तेः सार्थकतां प्रस्तूयत । | |
| **प्रश्नः -३** | **निम्नलिखितेषु द्वयोः टिप्पणी लेख्या ।** | ०४ |
| | (१) श्रीकृष्णस्य सभा ।<br>(२) उद्धवस्य बलराम प्रतिनिवेदनम् ।<br>(३) मन्वितार्थ क्रिया विलम्बे दोषम् ।<br>(४) कृत्रिमशत्रुत्वं चतुर्भिः वर्णनम् । | |
| **प्रश्नः – ४** | **निम्नलिखितेषु प्रश्नेषु पञ्चानाम् अतिलघुत्तरणि लिखत ।** | ०५ |
| | (१) श्रीकृष्णेनोक्तं लघ्वपि वाक्यं के उल्लङ्घयितुं असमर्थाः ?<br>(२) कस्य सन्देशेन श्रवणानन्तरं पृथापुत्रः यज्ञकर्तुं इच्छति ?<br>(३) काष्ठराशि दाहको वह्निरपि स्वतेजसा कं नातिक्रमति ?<br>(४) "घूर्णयन्" शब्दः कस्मिन् अर्थे प्रयोगः क्रियते ?<br>(५) ककुद्मि कन्या का आसीत् ।<br>(६) सात्वती सुनुः को आसीत् ।<br>(७) स्यातामत्रौ मित्रे च सूक्तेः ----------पूर्तिं करोतु ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुरुत ।** | ०८ |
| | (१) अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।<br>पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ | |

| | | |
|---|---|---|
| | (२) सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।<br>प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥<br>(३) सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये ।<br>तवानिशं निषण्णास्ते जानते जातु न श्रमम् ॥ | |
| **प्रश्नः -६** | **कस्यापि एकस्य सारसंक्षेपः लिखतु ।** | ०८ |
| | (१) उद्धवबलदेवश्रीकृष्णानां मन्त्रवर्णनम् ।<br>(२) द्वारकातः श्रीकृष्णस्य प्रस्थानवर्णनम् । | |
| **प्रश्नः -७** | **टिप्पणीं लिखत । (यथेच्छम् एकस्य)** | ०२ |
| | (१) बलभद्रस्य मन्त्रणा<br>(२) प्रज्ञाप्रज्ञयार्द्वाभ्यां वैषम्यम् । | |
| **प्रश्नः -८** | **निम्नाङ्कितेषु द्वयोः अतिलघूत्तराणि उत्तरं ददातु ।** | ०२ |
| | (१) का नरशिखित्रयी ?<br>(२) हिडिम्ब-रिपुः को आसीत् ?<br>(३) कः सोमं शीघ्रमेव पीडयति ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **निम्नलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत?** | ०८ |
| | (१) तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः ।<br>नौकमोजः प्रसादो वा रसभावविदः कवेः ॥<br>(२) तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।<br>अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ॥<br>(३) उपेयिवांसि कर्तारः पुरीमाजातशात्रवीम् ।<br>राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ | |
| **प्रश्नः -१०** | **कस्यापि एकस्य सारांशात्मकं उत्तरं लिखतु ।** | ०८ |
| | (१) द्वितीयसर्गस्य सार-संक्षेपः । (२) रैवतक पर्वत वर्णनम् । | |
| **प्रश्नः -११** | **टिप्पणीं लिखत । (यथेच्छं द्वयोः)** | ०४ |
| | (१) पौरुषं मा भून्नित्यम् । (२) विमृश्यकरनप्रकारत्वम् । | |
| **प्रश्नः -१२** | **अधोलिखितेषु प्रश्नेभ्यः पञ्चानाम् अतिलघूत्तराणि लिखत ।** | ०५ |
| | (१) द्वितीयसर्गे कस्य छन्दसः प्रयोगः क्रियते ?<br>(२) द्वितीयसर्गे कति श्लोकाः सन्ति ?<br>(३) शिशुपालवधस्याङ्गीरसः कः ?<br>(४) महाकवि माघस्य पितुः नाम किम् ?<br>(५) द्वितीयसर्गे कस्य अलङ्कारस्य प्रयोगः क्रियते ?<br>(६) शिशुपालवधे कति सर्गाः सन्ति ?<br>(७) श्रीकृष्णः कस्मै शतमागांसि सहिष्ये इति वचनं दत्तवान् आसीत् ? | |

***